22E

# टिळक महाराष्ट्र विद्यापीठ, पुणे

**संस्कृत विशारद (बी.ए.) – बहि:स्थ**

**परीक्षा : जानेवारी – २०२३**

**सत्र १ ले**

**विषय: पञ्चतन्त्र–काकोलूकीय (22E413)**

**दिनांक :०५/०१/२०२३** **गुण :१००** **वेळ : स. १०.०० ते १.००**

**सूचना :** सर्व प्रश्न अनिवार्य

**प्र. १ चतुरः गद्यांशान् माध्यमभाषया अनुवदत।** **(२८)**

१) कश्चित्क्षुद्रसमाचार: प्राणिनां कालसन्निभ:। विचचार महारण्ये घोर: शकुनिलुब्धक:।।
नैव कश्चित्सुहृत्तस्य न सम्बन्धी न बान्धव:। स तै: सर्वै: परित्यक्तस्तेन रौद्रेण कर्मणा।।
ये नृशंसा दुरात्मान: प्राणिनां प्राणनाशका:। उद्वेजनीया भूतानां व्याला इव भवन्ति ते।।
स पञ्जरकमादाय पाशश्च लगुडं तथा। नित्यमेव वनं याति सर्वप्राणिविहिंसक:।।

२) अथ रक्ताक्षे गते स्थिरजीव्यतिहृष्टमना व्यचिन्तयत् – अहो कल्याणमस्माकमुपस्थितं यद्रक्ताक्षो गत:। यत: स दीर्घदर्शी। एते च मूढमनस:। ततो मया सुखघात्या: सञ्जाता एते। उक्तश्च यत:
न दीर्घदर्शिनो यस्य मन्त्रिण: स्युर्महीपते:। क्रमायाता ध्रुवं तस्य न चिरात्स्यात्परीक्षय:।।
अथवा साध्विदमुच्यते –
मन्त्रिरूपा हि रिपव: सम्भाव्यन्ते विचक्षणै:। ये हितं वाक्यमुत्सृज्य विपरीतोपसेविन:।।
एवं विचिन्त्य स्वकुलाये एकैकां वनकाष्ठिकां गुहादीपनार्थं दिने दिने प्रक्षिपति न च ते मूर्खा उलूका विजानन्ति, यदेष स्वकुलायमस्मद्दाहाय वृद्धिं नयति।

३) अथान्ये तस्य भृत्या: स्थिरजीविनमुच्छृङ्खलवचनैर्जल्पन्तमवलोक्य तस्य वधायोद्यता मेघवर्णेनाभिहिता: –''अहो, निवर्तध्वं यूयम्। अहमेवास्य शत्रुपक्षपातिनो दुरात्मन: स्वयं निग्रहं करिष्यमि।'' इत्यभिधाय तस्योपरि समारुह्य लघुभिश्चञ्चुप्रहारैस्तं प्रहत्य आहतरुधिरेण प्लावयित्वा तदुपदिष्टमृष्यमूकपर्वतं सपरिवारो गत:। एतस्मिन्नन्तरे कृकालिकया द्विषत्प्रणिधीभूतया तत्सर्वं मेघवर्णस्यामात्यव्यसनमुलूकराजस्य निवेदितं यत् – ''तवारि: सम्प्रति भीत: क्वचित्प्रचलित: सपरिवार:'' इति अथोलूकाधिपस्तदाकर्ण्यास्तमनवेलायां सामात्य: सपरिजनो वायसवधार्थं प्रचलित:, प्राह – ''त्वर्यतां त्वर्यतां, भीत: शत्रु: पलायनपर: पुण्यैर्लभ्यते उक्तश्च –
शत्रो: प्रचलने छिद्रमेकमन्यच्च सश्रयम्। कुर्वाणो जायते वश्यो व्यग्रत्वे राजसेविनाम्।।

४) तच्छ्रुत्वा प्रहृष्टो मेघवर्ण आह – 'तात, कथयात्मवृत्तान्तम्। चिरादद्य दृष्टोऽसि।' स आह – 'वत्स, नायं कथनस्य काल:। यत: कदाचिदस्य रिपो: कश्चित्प्रणिधिर्ममेहागमनं निवेदयिष्यति, तज्ज्ञानादन्धोऽन्यत्रापसरणं करिष्यति।
तत्त्वर्यताम्, त्वर्यताम्। उक्तश्च –
शीघ्रकृत्येषु कार्येषु विलम्बयति यो नर:। तत्कृत्यं देवतास्तस्य कोपाद्विघ्नन्त्यसंशयम्।।
तथा च –
यस्य यस्य हि कार्यस्य फलितस्य विशेषत:। क्षिप्रमक्रियमाणस्य काल: पिबति तद्रसम्।।

५) अथैवमभिहिते स मेघवर्णो राजा चिरन्तनं पितृसचिवं दीर्घदर्शिनं सकलनीतिशास्त्रपारङ्गतं स्थिरजीविनामानं प्रणम्य प्रोवाच, 'तात! यदेते मया पृष्टा: सचिवास्तावदत्र स्थितस्यापि तव तत्परीक्षार्थं येन त्वं सकलं श्रुत्वा यदुचितं तन्मे समादिशसि। तद्युक्तं भवति, तत्समादिश्यताम्।' स आह, 'वत्स! सर्वैरप्येतैर्नीतिशास्त्राश्रयमुक्तं सचिवै:, तदुपयुज्यते स्वकालोचितं सर्वमेव। परमेष द्वैधीभावस्य काल: तत: स्वयमविश्वस्तैर्लोभं दर्शयद्भि: शत्रुर्विश्वास्य सुखेनोच्छिद्यते। तद् द्वैधीभावसंश्रितस्य तव स्वस्थाने वासो भविष्यति लोभाश्रयाच्च शत्रुमुच्चाटयिष्यसि। अपरं यदि किञ्चिच्छिद्रं तस्य पश्यसि तद्गत्वा व्यापादयिष्यसि।'

**प्र.२ कानपि दशसन्धीन् विघटयत।** **(१०)**

| | | |
|---|---|---|
| १) नृपतिस्ते | २) बलेर्नियमनम् | ३) कालेनैते |
| ४) कथमेतत् | ५) यदैव | ६) चेदम् |
| ७) व्यसनेष्वनादर: | ८) तेनाभिहितम् | ९) सोऽब्रवीत् |
| १०) तन्मया | ११) भक्षयितुमिच्छति | १२) मयाऽपहृते |

**प्र.३. केषाश्चित् दशानां रूपपरिचयं कारयत ।** **(१०)**

| | | | |
|---|---|---|---|
| १) सर्वे | २) रिपव: | ३) मया | ४) कृत्वा |
| ५) भर्ता | ६) प्रक्षिप्य | ७) ददर्श | ८) लुब्धकेन |
| ९) आदिशत् | १०)शत्रो: | ११)अस्माकम् | १२)गच्छति |

**प्र.४. कानि अपि दश वाक्यानि सूचनानुसारं परिवर्तयत।** **(१०)**

१) वयं रात्रौ न पश्याम: स्म। (स्म निष्कासयत।)
२) हंसा: पद्मवने नश्यन्ति। (वाक्यमेकवचने परिवर्तयत।)
३) त्वं किं मन्यसे? (त्वं स्थाने भवान् इति कर्तृपदं योजयित्वा वाक्यं पुनर्लिखत।)
४) ----- सह शुष्ककलहं कर्तुमारब्ध:। (तद् सर्वनाम्न: योग्यं रूपं योजयित्वा वाक्यं पुनर्लिखत।)
५) गजयूथेन बहव: शशका: निपातिता:। (वाच्यपरिवर्तनं कुरुत।)
६) स च रात्रावभेत्य सदैव तस्य न्यग्रोधस्य समन्तात् परिभ्रमति। (वाक्यं लङ्लकारे परिवर्तयत।)
७) पूजयैनं यथाविधि। (भवन्त: इति कर्तृपदं योजयित्वा वाक्यं पुनर्लिखत।)
८) य: नर: शीघ्रकृत्येषु कार्येषु विलम्बयति। (वाक्यं बहुवचने परिवर्तयत।)
९) बिलस्य वाणी कदापि मे न श्रुता। (बिलस्य शब्दस्य स्थाने गुहा शब्दस्य योग्यं रूपं योजयित्वा वाक्यं पुनर्लिखत।)
१०) अहं प्रत्यहं सेवां करिष्यामि। (वाक्यं लट्लकारे परिवर्तयत।)
११) मुनिना रवि: आहूत:। (वाच्यपरिवर्तनं कुरुत।)
१२) वयं विनष्टा:। (वाक्यं एकवचने परिवर्तयत।)

**प्र.५. कानि अपि त्रीणि वाक्यानि ससन्दर्भं स्पष्टीकुरुत।** **(३०)**

१) स्वजातिर्दुरतिक्रमा।
२) भूतान् यो नानुगृह्णाति ह्यात्मन: शरणागतान्।
३) बहवो न विरोद्धव्या दुर्जयो हि महाजन:।
४) श्रूयते हि कपोतेन शत्रु: शरणमागत:।

**प्र.६.** काकोलूकीयात् कामपि कथां स्वशब्दै: संस्कृतेन लिखत। **(१२)**

----------